ॐ

तत्सत्

चिद्-विलासः

(श्रीविद्या रहस्यम्)



दतिया, म.प्र.

— व्याख्याकार —

श्री पीताम्बरा पीठस्थ राष्ट्रगुरु, श्री१००८ श्रीस्वामीजीमहाराज

|| ॐ तत्सत् ||

CHID-VILAS
चिद्-विलास

An exhaustive commentary
by
His Holiness Rashtraguru
1008 Swamiji Maharaj
Pitambarapith, Datia.

Translated by
Dr. Yogesh Chandra Mishra



Pitambara Sanskrit Parishad
Datia, (M. P.)


प्रकाशक :

श्री पीताम्बरा संस्कृत परिषद्
पीताम्बरापीठ, दतिया
(म० प्र०)




मुद्रक :

स्वाति एण्टरप्राइज
२०, ग्रेट नाग रोड
नागपुर–९



भगवती
श्री पीताम्बरा बगला



सम्मतिः

भगवन्! चि० सुरेशपाण्डेयद्वारा प्रेषितं भवत्कृत-पुस्तकमदृष्टपूर्वं प्राप्य, अतितरां मे प्रासीददन्तःकरणम्। यद्यपि लघुकायमिदं पुस्तकं सरलसुबोध-कोमलकान्तपदावलीभिर्निबद्धं वर्तते तथापि परमगभीरपरमार्थभावस्य अति-दुरूहतया विशेषतः सङ्केतितशब्दानां बाहुल्येन च मादृशाल्पबुद्धीनां कृते अतिदुरूहतरमेवाभविष्यत् यदि सङ्केतितशब्दैः गोपितमपि भावं प्रकाशयन्ती ग्रन्थस्य यथार्थाभिप्रायं स्फोटयन्ती श्रीचरणैर्निर्मितेयं संक्षिप्तविवृतिः सहैव प्रकाशिता नाभविष्यत्।

भगवन्! विवृतेरेवायं महिमा यदयं चिद्विलासः मादृशाल्पबुद्धेरपिचेतसां विलासाय क्रीडनकमिवाभूत्।

भगवन्! क्षुरस्य धारावद् दुर्घटदुरूहपरमार्थमार्गे संतरणाय रथोद्धतस्य (रथवज्जवस्यैव) अपेक्षा भवतीति मनसि निधायैव मन्ये परमरोचकेन रथोद्धता छन्दसैवायं ग्रन्थो निबद्धो महात्मनेति। परमार्थमार्गानुसरणशीलानां साधकानां कृते विवृतिभूषितोऽयं चिद्विलासः प्रशस्तरथस्य कार्यमवश्यं करिष्यतीति दृढं विश्वसिमि।

रङ्गनाथ पाठकः
विद्यावाचस्पतिः
संस्कृत संजीवन विद्यालयः
चिड़ैयाँ टाँड़, पटना-१ (विहार)

Gurudevji !

Received the book CHID-VILAS sent by your honour through Suresh. I am heartily pleased to go through such a rare volume. Though written in a beautiful and simple language its content of spiritualism makes it difficult.

Specially the use of symbolical words would have made the book obtruse for a layman like me, had it not been acompanied by the simple and lucid Commentary of His Holiness Gurudevji. Its commentary makes it look like a toy. The road to spiritualism is full of thorns. It requires the speed of a chariot to follow this noble path. I think the writer has chosen 'Rathoddhate' metre because of this fact only. I am confident the book 'CHID-VILAS' simplified by authentic Commentary- will serve as a noble chariot for a SADHAK (devotee) on the road to spiritualism.

(**Rangnath Pathak**)
Vidyavachaspati
Sanskrit Sanjeevan Vidyalaya
Chiraiya tand, Patna-1 (Bihar)

□□□

Introduction

अहमेवास पूर्वं तु नान्यत्किञ्चिन्नगाधिप ।
तदात्मरूपं चित्संवित् परब्रह्मैकसंज्ञकम् ॥
—७/३२/२। दे० भा० ॥

The Divine Raj Rajeshwari **Shree Tripura Sundari,** whose attributes are **Sat, Chit** and **Ananda** is the **Paratattwa, Chit Samvit** and **Mahavakyas** reveal **Parashakti Tatttwa** only. The **Brahma** and **Brahma Vidya** of **Upanishads** is **Para Shakti** and is the culminating point for all the thought-currents of spiritual philosophies. **Agam Shastras** propound **Shree Vidya** verily, the source of inexhaustible light energy (Prakash) and controls the whole universe. **Nigam** and **Agam** i. e. Vedic and Tantric literature dwell exhaustivly on the worship of **Para Brahma.** Of the philosophic thoughts Shankara's Vedanta is the nearest to it which mainly dwells upon **Vivartavada. Shakta** lore of thought also has **Advaita** as its goal, but gives equal importance to both **Vivartavada** and **Parinam Vada.** Vedanta, therefore, has been able to expound **Brahma** as a philosophy only and has mentioned **Shravan, Manan** and **Nididhyas,** but could not give a practical approach to it.

Tantra has defined **Para Tattwa** in its entirety and has propounded practical guide- lines to its approach and thus has thrown light to the devotees of this path. Yearning for **Advaita,** the **Jeeva** (or self) merges into **Para Tattwa** and reveals the truth about the **Advaita** philosophy. According to **Agama,** the disciple should, first, obtain or be blessed by the grace of

the Master (**Guru**) and then practise **Sadhna** according to scriptures. He attains his goal by practising his **Krama** from the morning Karma or **Pratah Kriya** onwards. The worship of **Shree Yantra Raj** is held in high esteem in **U-Pasna** and is the external form of **Workship**. It is the stepping-stone to Inner or esoteric worship. The merging of oneself in the **Para Tattwa** is the main esoteric worship. Till this state of harmony (**Laya**) is achieved, one must do external worship. This form of worship propagates **Vivarta Vada** and its followers are extremely few fortunate **Paramhansas** like **Shukadev, Vashishta Sanakadi.** There are many books relating to the external form of worship, but regarding the esoteric aspect of worship, the literature is rather scanty or non-existent. This illuminating work **Chid-Vilas** completely deals, in details, with esoteric aspect of worship. Bath, **Bhut Shuddhi, Nyas** Worship, Sacrifice, **Homa** etc. are essential steps in external worship and how these are performed in esoteric worship, is the main subject of this work. This is the ultimate aim of **Sadhana.** The **Sadhaka** becomes free from all bondages (**Jeevan Mukta**) in this life itself, and remains constantly absorbed in Supreme Bliss (**Brahmananda**). This is the highest attainment of human life.

The 38 shlokas contain the complete secret of this type of worship. The **principle** of **Advaita Tattwa** which is the theme of this work, is also exhaustively available in a book **Vigyan Bhairava,** in Anushtup Chanda, by **Bhairavacharya** Acharya Deshika Pravar, Bhaskar Ray, freely quotes from both these works in his book **Nitya Shodashkarnav** in the 8th Ullas. Thus it is beyond doubt that these two works **Chid-Vilash** and **Vigyan Bhairava** were published before Bhaskar Ray's period. We obtained this work from kumwar Balbir Singh who is a famous poet and a disciple of Maharajji.

Tantrik cult lays down a definite, disciplined path of **Sadhana.** Generally people think that Tantrik **Sadhana** is an external form of worship and is practised for the purpose of mundane desires. No doubt charms and spells are a part of it, but its spiritual aspect has so far been neglected. Tantra is neither the refuge of the dis-appointed nor the luxury of the

great. It is a dynamic and living faith. The great Saint, His Holiness Maharaj ji of Pitambarapitha always lays stress on the metaphysical aspect of Tantrik **Sadhana.** He has done a great service of humanity by bringing home to us that this cult emancipates man from mortal bonds and brings him deliverance.

The Three **Puras** of Raj Rajeshwari Tripura Sundari constituted by the **Shakti** of Agam, Tatwik **Brahma** of Vedanta and **Chitta Vritti Nirodhatmak Yoga** are very lucidly and Vividly explained by His Holiness Gurudevji in his commentary on **Chid-Vilas,** which occupies a foremost place in propounding the asetoric worship of Tantrik cult. Rigorous practice of the discipline of Padyopchar, Darpanopchar, Avahanam and Guru Paduka Japa is prescriped in Chid-Vilas. Their practice harmonises jeeva with self. The unknown writer has brought beautiful similies of external and internal form of worship i.e. The vibrations generated by the manifestation of the Tattwas are the movements of the **Chamars.** (Shlok 27th). Through merging the consciousness in super-consciousness, Jeeva finally becomes one with the cosmic-conciousness.– **Chid.** The purification of Tattwas of Jeeva under the lotus feet of Gurudev, enables him to penetrate into the realms of consciousness, **(Guru Deeksha).** Jeeva is liftted out of the physical conditions of life and attains extinction of Ego. **(Nivedanam)** The esoteric worship culminates in-to seeing, doing and being **Chid. (Visarjanam).** This stage is the realisation of **Maha Bindu** or the establishment of **Layayoga** or the culmination of **Knowledge, Bhakti And Action.**

***Dr*. Yogesh Chandra Mishra**

Acknowledgement

The Parishad is highly pleased to bring out the second publication of CHIDVILAS with the blessings of Rajarajeshwari Goddess Pitambara. The popularity of the book is evident from the fact that all the copies of the first Edition have been exhausted. Several scholars and Sadhakas, Chief among them Shri M. P. Pandit (Pondichery), opined and desired an English version of CHIDVILAS. Hence Dr. Yogesh Chandra Mishra, a member of our family translated the book into English. Shri Shiv Nath Sharma Director of Shiv Shakti Press met the cost of printing of the present volume. Shri Hemchandra Mishra & Motilal, disciples of this Holiness Shri Maharaj Supervised the proof and publication. We are grateful to all of them to have brought out the book under the lotus feet of Gurudev.

We hope the illustrious work will illumine the path of devotees to realise the ultimate Reality.

Dated 20th. March 1977
Place : Datia

Brij Nandan Shastri
Secretary
Peetambara Peeth Sanskrit Parishad
DATIA (M. P.)

Review.

CHID-VILAS

Published by

Peetambara Peeth, Sanskrit Parishad,
Datia (M. P.)

This is a concise text of 38 Verses giving the essentials of Shri Vidya. The Sanskrit text is accompanied by a lucid commentary by Swamiji Maharaj of the pitha. The purport of each verse is given in Hindi. The Introduction by Shri Brijnandan Shastri gives a summary of the entire work; verse by verse, and brings out its merits in comparison with other similar treatises on Shaktaism. It is known how Shri Vidya represents a conference of Agama, Vedanta and Yoga. The speciality of its stress on dynamic spirituality, preparatory role of outer worship and technique of inner worship, hormonisation of Shiva and Shakti principles in parashakti–these and other important points are in special types.

These verses have a mantric character and are spiritually potent. The metre, rathoddhata, lends itself to happy memorising. The book deserves to be translated into English for wider appreciation and utilisation.

M. P: Pandit

Review

" CHID-VILAS "

Published by Peetambara Peath. DATIA (M. P.)


This is one of the many books published by the Peetambara Peeth Sanskrit Parishad under the guidance of the Great Sakta Savant Shri 100 Swami Jee Maharaj. Apart from Makrand Stotra, Shri Vidya Upasana paddhaty. Panchastavi, Tripura Mahimna Stotra (all of Shri Kula) and many other books on the subject Chid-Vilas appears to be the best and the last thing on the subject of Shri VIDYA. It is an abstruse tantra lore whose authorship is not known but can to a certain measure be attributed to Kalidas, as it resembles in certain ways his widely celebrated Chidgagana Chandrika. The introduction by Shastri Brijnandan is a good one and explains in certain ways the many abstruse points. It propounds para Vidya in HER supreme aspect. A new dimension has been added to the meaning of Khechari Mudra in verse 36. The main Sanskrit commentary in the 38 verses is the life of the book and throws light on many an abstruse point of Shri Vidya. The fact that it has been published through the grace of His Holiness 1008 Swami Jee Maharaj of Peetambara peeth adds new dimensions to the celebrated work which some people may think that this should not have been made available to all and sundry whether they are initiated or competent enough to receive it, but what I can feel personally, is that it may make an impact on the minds of those who are keen to promote their knowledge. After all like a good farmer, a Guru throws so many seeds in the soil at the time of sowing and same may sprout and same may not– all depending on the fertility of the soil. It is also a very surprising moot point that the Upasana of Brahm Vidya through HER yantra called Shri

Yantra is enjoined upon even the vedantin Shankracharya and also in the not so far recent times even Bhagwan Raman Maharishi Vedantin– has had a Shri Yantra installed at Ramna Ashram, which was sanctified by his own graceful hands. The get up of the book is very fine and surprisingly has a meagre cost of Rs. Two only.

A word about great Sakta Savant responsible for its publication will not be out of context here. He is an embodiment of the Devi himself with a charitable disposition and is very famous for this specialised Sakta lore. He is a great Yogi combining in himself both CHAMATKAR and erudite scholarship. His treatise on Upanishads from the Sakta point of view is as far as I know the only one of its kind. He has been for about 50 years at Datia–18 miles from Jhansi towards Gwalior– serving the Sakta world and no one knows who he is and where from he comes. Even after publishing so may scholarly treatise on the Hindu Religion he has never mentioned his name except simple Swami. Most unassumingly he makes light of his own personal antecedents. Do we know much about the great Grammarian PANINI regarding his parentage etc.

His specialization in accultism has been well borne out by his Yajnas for the Rashtra which also during conflict with Chinese was mentioned in the editorial of Illustrated Weekly of India some where in Oct. 1963. One of his famous books is Bagla Mukhi Rahasyam a comprehensive tantra treatise published for the first time about this Sidh Maha Vidya. The books are a boon to the Hindus and especially to the Sakta World.

Major B. N. Thussu
FRAS
(London)



ताम्बरापीठाधीश्वराः परमपूज्य श्री १००८ श्री स्वामीजी महाराज
वनखण्डेश्वर, दतिया

॥ श्रीगणेशाय नमः ॥

❋ श्रीपराम्बायै नमः ❋

अथ चिद्विलासः

स्वप्रकाशशिवमूर्तिरेकिका
तद् विमर्शतनुरेकिका तयोः ।
सामरस्यवपुरिष्यते परा
पादुका परशिवात्मनो गुरोः ॥१॥

टीका :—

(मंगलाचरणम्)

नत्वा गुरुपदाम्भोजं शुद्धं ज्ञानप्रदं नृणाम्,
विवृतिं चिद्विलासस्य कुर्वे स्वात्मप्रबोधिनीम् ।

अयं चिद्विलासनामा ग्रन्थः केनचिद् महात्मना श्रीविद्यायाश्चरमलक्ष्यभूतानि तत्त्वानि प्रकटीकर्तुं श्रीविद्यातत्त्वं च बोधयितुमष्टत्रिंशच्छ्लोकैरुपनिबद्धः । तदुक्तसांकेतिकशब्दानामर्थावबोधाय संक्षिप्तं विवरणं क्रियते ।

स्वप्रकाशेति :—परतत्त्वस्य प्रकाशात्मिका एकिका-एकामूर्तिः शिवः तद्विमर्शरूपा तनुरपि एकिका एकैव सा शक्तिपदेनोच्यते प्रकाशविमर्शाभ्यां नामरूपात्मकं सर्वं प्रपञ्चजातमाविर्भूतम् । तयोः प्रकाशविमर्शयोः सामरस्यरूपं वपुः ब्रह्मस्वरूपिणी पराशक्तिरिष्यते इच्छाविषयीक्रियते सैव परशिवात्मनो गुरोः पादुकारूपेण स्मर्यते साधकैः । परगुरुपादुकामन्त्रो गुरुमुखादवगन्तव्यः ।

(ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः हसखफ्रें ह स क्ष म ल व र यूं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क० १५ ह० १५ सौः क्लीं ऐं ह्रीं श्रीं स ह ख फ्रे स ह क्ष म ल व र यीं हंसः शिवः सोहं ह्सौः स्हौः श्रीपरशिवपादुकां पूजयामि नमः) गुरुस्मरणादेव सर्वाः सिद्धयो भवन्ति तद् विज्ञानार्थं 'स गुरुमेवाभिगच्छेत् इति श्रुतेः' ॥१॥

रथोद्धताछन्दस्तल्लक्षणं यथा–रान्नराविह रथोद्धता लगौ ।

भावार्थ :—स्वप्रकाश रूप एक मूर्ति का नाम शिव है और उसकी विमर्श रूप दूसरी मूर्ति जिसे शक्ति कहते हैं, दोनों के सामरस्य रूप का नाम पराशक्ति है। पर शिवात्मक गुरु की पादुका रूप से जिसका स्मरण होता है ॥१॥

This work entitled Chid–Vilas consisting of 38 shlokas was written by some 'sage' to unveil the highest aims of Shree–Vidya devotion (Tattwa) and to make it knowledgeable to all. Since it is written in terminology not known to every body, a short explanatory description is being given.

1. The Para–Shakti which is all power beyond every thing, exists in a state of Sama–Rasya–Shiva is light (Prakash) itself and Shakti is its (Vimarsha) Expansive Radiance. The devotees should meditate on this Parashakti in the form of Para Guru Paduka Mantram.

Out of this light (Prakash) and expansive radiance (Vimarsha) the whole universe of names and shapes has originated.

"एकोऽहं बहुस्याम्" इति श्रुतिवचनात् परमबिन्दुसकाशात् अग्निचन्द्र-सूर्यनामकं बिन्दुत्रयमाविर्भूतम् तस्मादेव त्रयसमुदायात् सर्ववस्तुजातं प्राकाश्यं नीत तदेवाह चित्रभानुरिति :—

चित्रभानु शशिभानुपूर्वक
त्रित्रिकेण नियतेषु वस्तुषु ।
तत्तदात्मकतया विमर्शनं
तत्समष्टि गुरुपादुका ज़पः ॥२॥

टीका :—

पूर्वस्मिन् पद्ये प्रकाशविमर्शात्मकं शिवशक्तिमयं तत्त्वं निर्दिष्टं तस्मादेव चित्रभानु: अग्निविन्दु: शशी चन्द्रविन्दु: भानु: सूर्यविन्दु: इत्येतत्पूर्वकेण त्रिकेण समुदायेन सर्गमाविर्भूतम् । प्रकाशाद् वामा-ज्येष्ठा-रौद्री-शक्तय: आविर्भूता: । विमर्शात् इच्छाज्ञानक्रियास्तथा ब्रह्मविष्णुरुद्रा पुरुषशक्तय: सञ्जाता: त्रित्रिक-पदेनैतत्सर्वं गृह्यते ।


गीतायाञ्च :—

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।। इत्यनेनोक्तं समन्वितं भवति । नियतेषु सर्ववस्तुष्विदं त्रिकं व्याप्त-मस्ति । त्रिकसमुदायरूपेण सर्वेषां पदार्थानां विमर्शनं पृथक् पृथग्भवति । एतेषां सर्वेषां समष्टि: परारूपो गुरुपादुकाजपो मनसावृत्तिरूपोऽभ्यास: साधकै: क्रियते ।।२।।

भाषार्थ :—अग्नि, चन्द्र, सूर्य यही त्रिविन्दु प्रत्येक तत्त्व एवं पदार्थों में विद्यमान है । इन तीनों का समष्टि रूप ही गुरुपादुका जप है ।।२।।

2. The divine will, Eko–Aham–Bahu–Syam as given in Shruti, expressed itself through three primordial Bindus appearing out of the Para Shakti.

These three Bindus are fire (Agni), Sun (Surya), Moon (Chandra). The whole universe sprang forth from these three cardinal points.



Three Shaktis, Vama, Jyeshtha And Roudri appeared out of the light (Prakash) of these three primordial points, and from their Vimarsha (the Expansive-radiance) evolved, Ichha, Gyan and Kriya i.e. Divine will, knowledge and action which are governed by the Deities Brahma, Vishnu and Rudra respectively Their collective understanding is the Guru–Paduka–Japam.

गुरुतत्व-शिवतत्व-पराशक्ति-तत्वात्मतत्वेषु अभेदत्वात् अद्वैतमेवास्याः श्री विद्यासाधनायाः मन्तव्यम् । अस्य साक्षात्कारेण सर्वं क्लेशजातं निवर्तते । क्लेशानां कारणं मायीयं कार्मणमाणवं च त्रिविधं मलमेभ्य एवं पञ्चक्लेशाः समुद्भूताः । ते च संसारावस्थायां जीवात्मानमनवरतं क्लेशयन्ति । जीवात्मा अविद्यावस्थायां शिवतत्वात्पृथगेव स्वसत्तामनुभवति । तन्निवृत्तये अद्वैत भावना कर्त्तव्या । अद्वैतसाक्षात्कारे सति सर्वक्लेशनिवृत्तिः परमानन्दप्राप्तिश्च भवति तदेव तीर्थरूपेणोपदिश्यते तीर्थमिति :—

तीर्थमद्वयसुधारसोदधे-
वारितं निजविमर्शवेलया ।
आणवादिमलमोचनोचितं
स्नानमत्र विधिना निमज्जनम् ॥३॥

टीका :—

सर्वं खल्विदं ब्रह्मेति श्रुत्येदं दृश्यमानं नामरूपात्मकं सर्वं ब्रह्मैवाद्वैत-तत्वमेव तदेव सुधारसोदधिरमृतसमुद्रः, तस्य निजविमर्शवेलया वारितं स्वात्मविमर्श-शक्त्या मर्यादीकृतं तदेव तीर्थपदवाच्यम् । तरन्ति पापेभ्यो जनाः येन तत्तीर्थमिति-व्युत्पत्त्या तीर्थशब्दनिष्पत्तिः ब्रह्माद्वैतसाक्षात्कारेण सर्वक्लेशानां निवृत्तिः । अत्र तीर्थे विधिना श्रीविद्योपासनोक्तप्रकारेण निमज्जनमेकान्तिकनिमग्नता, तेनाणवादि मलत्रयस्य मोचनोचितं दूरीकरणरूपं स्नानं भवति । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः इति श्रुतेः' ।

भावार्थ :—अपनी विमर्श शक्ति रूपी तट के द्वारा मर्यादित हुआ अद्वैततत्व ही अमृत का समुद्र है उसे ही तीर्थ कहते हैं। इसी तीर्थ में शास्त्रोक्त विधान से श्री विद्या की उपासना ही निमज्जन अर्थात् स्नान है । इसी स्नान के द्वारा मायीय कार्मण, आणव, इन त्रिविध मलों का विनाश होता है ॥३॥

3. The realisation of Guru, Shiva, Shakti and 'Self' as one single entity is the sole aim of Shree Vidya devotion. Once this is achieved all the miseries and sorrows of the world vanish. Worldly miseries are of five types and arise out of three kinds of impurities Mayeev, Karman and Anav. The self (Jeeva) feeling alineated from Shiva, is in a state of Avidya ignorance and is writhing in constant misery.

The realisation of Advaita as the supreme truth releases man from the sorrows of the world and he enters into a state of eternal bliss and peace.

As we know, in all forms of external worship the cleansing of the body is the first and the most important ritual, but here the learned author unfolds a unique way of cleansing one–self.

The Advaita Brahma (Prakash) is the sea of nector contained in its own Vimarsha– Expansive radiance, and that is the sacred bathing place. Here alone the dedicated pursuit of Shree Vidya in accordance with the laws of scriptures is the sacred bath. It liberates us from the three kinds of impurities (Mayeev, Karman and Anav) which are at the root of all worldly suffering.

सन्ध्यदेवतारूपेण श्री परादेवतां स्तौति सेति :—

सा निशा सकललोकमोहिनी
वासरः स खलु सर्वबोधकः ।
सामरस्यमिह सन्धिरेतयोः
श्रीपरैव ननु सन्ध्यदेवता ॥४॥

टीका :—

वैचित्यसंपादनकर्त्री माया मोहिनीनदत्राच्या (महामाया हरेश्चैषा तया संमोह्यते जगत्) सकललोकानां सकलसंज्ञकानां जीवानां राग-द्वेषमयविषयेषु

प्रवर्त्तनकर्त्री सैव निशा रात्रिरज्ञानस्वरूपा शिव एवं सर्वबोधको वासरः प्रकाशस्वरूपो दिवसरूपः प्रकाशसाम्यात् । एतयोर्द्वयोः सन्धिः, इह शास्त्रे सामरस्यं समरसस्य भावः सामरस्य ननु निश्चयेन सन्ध्यदेवता अधिष्ठानरूपा श्रीपरैव श्रीरूपा पराशक्तिरेव मन्तव्या ॥४॥

भावार्थ :—समस्त संसार को मोह के वशीभूत करने वाली मायारूपिणी शक्ति ही रात्रि है एवं चराचर विश्व को बोधन कराने वाला अर्थात् ज्ञान दाता भगवान् शिव ही दिवस है। जब इन दोनों की सन्धि होती है तभी सामरस्य प्राप्त होता है। श्रीविद्या ही सन्धि है ॥४॥

4 The author next explains Samrasya– the manner in which Shiva and Shakti are united. He also throws light on their respective attributes.

The Shakti being Maya– an illusion which engulfs the whole universe is compared to night, which blankets all creation. The Shiva being Light i. e. knowledge (Gyan) resembles the day–which dispells all darkness and illumines every thing.

The confluence of day and night in the evenings and mornings is called Sandhya which symbolises Shree Vidya itself as it represents the divine union of Shiva and Shakti.

अहन्तया पूजनमाह स्वप्रकाशेति :—

स्वप्रकाशशिव एव भास्करः
सद्विमर्शविभवा मरीचयः ।
यैस्तथा स यदि वेदिमण्डलं
तस्य पूजनमहन्तया मतिः ॥५॥

टीका—

स्वप्रकाशस्वरूपः शिव एव भास्करः सूर्यस्वरूपः सद्विमर्शविभवा विमर्शतत्वादाविर्भूता मरीचयः खेचरी-दृक्चरी-भूचर्यादिस्वरूपाःयैर्मरीचिमण्डलैस्तथा शास्त्रोक्त प्रकारेण स साधको वेदिमण्डलं कृत्वा निर्माय तस्य शिवस्य पूजनं

अहन्तया अद्वैतरूपेण मतिः नाम मतं करोति । वर्णाग्र्यः अकारः प्रकाशरूपः, हकारः शक्तिरूपः, उभयोरैक्यमद्वैतरूपम् अहम् अहमेवेति चिन्तनं पूजनं सर्वश्रेष्ठम् । अहं पदेन जीवस्यापि ग्रहणं कर्त्तव्यम् । शिवशक्तिसामरस्यात् तस्याप्यणुरूपेण प्रादुर्भावात् अतएव अहंपदेन तस्यापि बोधो जायते अतएव केचित् साधकाः शिवरूपेण केचिच्छक्तिरूपेण च जीवस्वरूपं मन्यन्ते ॥५॥

भाषार्थ :— स्वप्रकाशरूप भगवान् शिव ही सूर्य रूप हैं। उनकी सत् शक्ति का वैभव ही किरण समूह है उसी किरण मण्डल की वेदी पर अहं (अकार अर्थात् प्रकाशरूप शिव तथा हकार का अर्थ है विमर्शरूपिणी शक्ति इन दोनों की एकरूपता ही सामरस्य रूप है। इसी को अहं कहते हैं) रूप से पूजन एवं चिन्तन साधक को अभिमत है ॥५॥

5. The next stanza gives an idea of the worship to be performed. Lord Shiva being Light itself is the sun and the conglomeration of its rays is the 'Expansive Radiance'.

On the altar of these divine rays the devotee should contemplate on the Aham, the I Principal. Aham in Sanskrit is made of the first letter Aa symbolizing SHIVA and the last letter HA symbolising Shakti (Vimarsha)– the Expansive Radiance. Thus it includes the whole Garland of letters i. e. Shabda Brahaman which is nothing else but Para Shakti Shree Vidya itself.

त्वक्पलास्थिमयभित्तिभावितं
ज्ञानदीपविगलत्तमोगुणम् ।
आत्मतत्वमिह यागमण्डपं
तस्य पूजनविधानमर्चनम् ॥६॥

टीका :—

सत्वरजस्तमोगुणानां परिणामतः शरीरमिदं जातं, स्थूलं तमसः, क्रियात्मकं रजसः, ज्ञानात्मकं सत्वगुणतः परिणतम् । त्वक्पलास्थिमयं मांसचर्मास्थिमयं तद्भित्त्याभावितमाधाररूपेण ज्ञानदीपेन विगलत्तमोगुणं सत्वगुणात्मक ज्ञानदीपेन अन्धकारस्वरूपं विगलत्तमोगुणं निवृत्ततमोऽन्धकारमिह शरीरे आत्मतत्वमेव यागमण्डपं कृत्वा तस्य पूजनविधानं शास्त्रोक्त रीत्या अर्चनं भवति ॥६॥

भाषार्थ :—सत्व, रज, तमोगुण के परिणाम से ही यह शरीर उत्पन्न हुआ है तथा त्वचा, मांस, और अस्थिमय है यही साधना का आधार है। इसमें सत्व-गुणात्मक ज्ञानरूपी दीपक से तमोगुणात्नक अन्धकार को नष्ट करते हुये अपनी आत्मा को ही यज्ञ मण्डप बनाकर उसके पूजन का विधान ही अर्चन हैं ॥६॥

6. This body which is made up of skin, flesh and bone is born out of three attributes (Gunas), i. e. Sattwa Rajas and Tamas. The gross matter is made up of 'Tamas', the active (Kriyatmak) part is made up of Rajas' and the knowledge (Gyanatmak) part, of Sattwa. The body is a means for devotion wherein the devotee should kindle the flame of knowledge (Gyan) so that darkness-ignorance-due to 'Tamas' is dispelled. He should further contemplate on his soul (Atma) as 'Yagyna Mandapa' and worship it according to the prescribed modes.

पाशनिवर्त्तको भगवान् शिव इत्याह वेदिकेति :—

वेदिका हृदयपद्मकर्णिका
चिन्मयी वसति तत्र देवता ।
यो हि तद्यजनकर्मकर्मठ-
स्तस्य पाश भिदुरः स भैरवः ॥७॥

टीका :—

हृदयपद्मकर्णिका वेदिकारूपेण चिन्तनीया। अनाहतचक्रस्थितं पद्मं सहस्रारस्थितं च हृदयपदेन गृह्यते तत्र चिन्मयी शक्तिः देवता रूपेण वसति तस्या एवायं विलासो जगद्रूपयोः हि साधकस्तद्यजनकर्मणि कर्मठः निपुणः तस्य पाशभिदुरः सर्ववन्धनिवर्तकः स भैरवः स भगवान् शिव एव। "ज्ञात्वा देवं मुच्यते सर्वपाशैः" "पाशवद्धो भवेज्जीवः पाशमुक्तः सदाशिवः"। अष्टौ पाशाः तन्त्रेपूपदिष्टाः तद्यथा—"घृणा लज्जा भयं शङ्का जुगुप्सा चेति पञ्चमी। कुलं शीलं तथा जातिरष्टौ पाशा इमे स्मृताः" ॥७॥

भाषार्थ :—हृदयस्थित अनाहत चक्र एवं मस्तकस्थित सहस्रार चक्र इन दोनों पद्मों को हृदय कहते हैं। इन्हीं में श्री परा शक्ति का निवास है जिसकी कृपा

से ही यह सम्पूर्ण संसार उद्भूत हुआ है जो साधक इन चक्रों में उस परा शक्ति के पूजन में रत हैं उनके समस्त वन्धनों को भगवान् भैरव काट देते हैं ।।७।।

7. Next the author relates as to how a devotee can attain freedom from bondages.

Both the Heart (Anahat Chakra) and Thousand petalled lotus (Sahsrapadma) are considered to be the seat of the soul. The Parashakti which is responsible for creation of the whole universe resides in these two centres. Those devotees who are engrossed in the worship of 'Parashakti' in these two lotuses, are empancipated by Lord Bhairava who is Lord Shiva himself.

Ordinary human being (called Jeeva) is like an animal (Pashu) who is bound down by bondages (Pashas) and when these bondages are cut and the Jeeva is freed, it attains Shiva (Shivatva). The deity which cuts down these ties (Bhidurrah) is Lord Bhairava.

विश्वकारणं विकल्पबुद्धिनिवर्त्तकमाह विश्वेति :—

विश्वभेदविभवो विकल्पधी-
लक्षणो भवति विघ्नसन्ततिः ।
निर्विकल्पनिजधामविश्रम-
स्तन्निराकरणमत्र कीर्तितम् ।।८।।

टीका :—

विश्वभेदस्य विभवः कारणं विकल्पधीर्लक्षणः, अहंममाभिमानरूपो विघ्नानां सन्ततिः स एव भवति । क्लेशानां कारणं द्वैतबुद्धिरेव निर्विकल्पधाम्नि शैवे पदे विश्रमस्तन्निराकरणमत्र कीर्त्तितम् । शिवे पदेऽभेदेन स्थितिरेव क्लेश निवर्तिकेति भावः ।।८।।

भावार्थ :—अहंममाभिमानरूप विकल्पबुद्धि ही विघ्नों का कारण है । अत एव निर्विकल्पात्मक शिव पद मे विश्राम ही एक मात्र विकल्पबुद्धि रूपी विघ्नों का निराकरण है ।।८।।

8. In the process of evolution after the Shuddha Vidya Tattwa, the kingdom of the Maya starts and is responsible for doubts- Vikalpa. This is because the self (Jeeva) starts experiencing a separate existence from Shiva. It is brought about by the five fold curtains of Maya called Panch–Kanchukas. As a result, the individual Aham comes into play, instead of that of universal Aham. This gives origin to all the maladies that self or (Jeeva) experiences. Therefore it is enjoined upon all to take absolute rest in the contemplation of Nirvikalpa– the abode of Lord Shiva and thus experience absolute bliss and peace.

यत्र निर्विषयबोधलक्षणः
स्वात्मशम्भुरवतिष्ठतेऽनिशम् ।
तत्वजालकमिदं शिवावधि
क्षमामुखं सकलमासनं मतम् ॥९॥

टीका :—

यत्र परस्मिन् पदे निर्विषयबोधलक्षणः निर्गुणो निराकारस्वरूपः स्वात्मरूपः शम्भुः शिवोऽनिशं सर्वदाऽवतिष्ठते विराजते । तस्य क्ष्मामुखं पृथ्वीतत्वमारभ्य शिवावधि तत्वजालकं षट्त्रिंशत् तत्वजातं सकलमासनं मतं योगिनाम् । तत्वानामेषः क्रमः पृथ्वी, जलं, तेजः वायुः, आकाश इति पञ्चभूतानि, शब्द-स्पर्श-रूप रस-गन्धाः इति पञ्चतन्मात्राणि, वाक्पाणिपादपायूपस्थनामानि पञ्च कर्मेन्द्रियाणि, श्रोत्रत्वक्-चक्षू-रसनाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि, मनोबुद्धिरहङ्कार इति त्रिविधमन्तःकरणं, प्रकृतिः पुरुषः कला, विद्या, रागः कालः, नियतिः, माया शुद्धविद्या, ईश्वरः, सदाशिवः, शक्तिः शिवः इत्येतत्सर्वं श्लोके तत्वजालकपदेन प्रोक्तम् । पञ्चमश्लोके "अहम्रूपेण यत्तत्वमुपदिष्टं तत्प्रत्याहारन्यायेन सर्वेषां षट्त्रिंशत् तत्त्वानामपि वाचकं स्वीकृतम् तद्यथा पञ्चभूतानां वाचकः कवर्गः पञ्च तन्मात्राणां चवर्गः कर्मेन्द्रियाणां टवर्गः ज्ञानेन्द्रियाणां तवर्गः, मनः समारभ्य पुरुषपर्यन्तस्य पवर्गः, कलामारभ्य मायापर्यन्तस्य य र ल वाः, शकारमारभ्य क्षान्ताः शुद्धविद्यादिशक्तिपर्यन्ताः तत्वानि स्वराणां षोडश संख्यकानामकारे समावेशात् । अकारः शिवस्य वाचकः प्रोक्तञ्च

अकार: सर्ववर्णाग्र्य: प्रकाश: परम: शिव: । हकारोऽन्त्य: कलारूप: विमर्शाख्य: प्रकीर्त्तित: ।। सर्वेषां तत्वानां शिवशक्तिपदार्थादाविर्भूतत्वात् तत्रैव च लयत्वाद् "अहम्," मात्रमेवावशिष्यते ।।९।।

भाषार्थ :—जिस स्थान पर निर्गुण निराकार स्वरूप शिव भगवान् सर्वदा निवास करते हैं वही स्थान पृथ्वी तत्व से लेकर शिव पर्यन्त ३६ तत्व उनका सम्पूर्ण आसन है ।।९।।

9. Now the learned author describes the seat (Asanam) which is to be offered to the deity.

Lord Shiva, in this unmanifested form, is transcending and permeating the Thirty six Tattwas from the 'Earth' (Prithvi Tattwa) on to the Shiv Tattwa. All these constitute the seat for the deity. Amongst the Tattwas respectively the five Bhutas are Earth, Water, Fire, Air, and Ether. The subtler forms of these Bhutas exist as five Tanmatras respectively termed as Smell, Taste, Form, Touch and Sound. The five senses responsible for activity (Karmendriyas) are Mouth, Hands, Feet, Rectum and Penis. The five senses of Knowledge (Gyanendriyas) are Ears, Skin, Eyes, Tongue and Nose. The Antah-Karan is composed of Manas, Buddhi, and Ahamkara. Next come Prakarti and Purusha, From here onwards reign the five fold Kanchukas —veils of the the Maya which are respectively Kala, Vidya, Raga, Kala and Niyati. Then follow the Shuddha Tattwa the Shuddha Vidya, Ishwara, Sadashiva, Shakti and Shiva. This is the network of thirty six Tattwas through which the world has come into manifestation. This is represented by the word Aham derived according to the principle of Pratyahar of Panini grammar, where the first and last letters of the word are not only indicative of themselves but also of the letters in between them, as has already been explained in the commentary on Shloka 5.

The five main elements (Panch Bhutas) are represented on the Shabda Brahma aspect by the letter Ka, Kha, Ga, Gha Gna. The five subtler aspects of these Bhutas are represented by Cha, Chha, Ja, Jha, and Yna. The five Karmendiryas are symbolized by 'Ta, Tha, Da, Dha, Na'. The five Gyan-endriyas are represented by 'Ta, Tha, Da, Dha, Na'. From Manas to Purush Pa, Pha, Ba, Bha, Ma. symbolize the Tattwas. From Kala to Maya ya, ra, la, va, and from Shuddha Vidya to Shakti are represented by Sha to Ksha. Akar i.e. the alphabet A is permeating all the sixteen vowels, hence represents all of them. It is the foremost of all the letters, it is light and is supreme and has been compared to Shiva. Ha, the last letter is Kala–Roop and is Vimarsha– the Expansive–Radiance and represents Shakti. It is now quite evident that this world Emanates from Shiva and Shakti on the Tattwic side and on the Shabda Brahma aspect it is represented by letters from Akar to Hakar which on dissolution leaves behind Aham only.

वेद्य संविद इदं स्फुरन्मनो
वेत्तृसंविदि विलापनामयी ।
वृत्तिरद्वयविमर्शविग्रहा
प्राण संयति रुदीरितोत्तरा ॥१०॥

टीका :—

वेतृ वेद्ययोः स्फुरणकारिणी परा संवित् । यदा वेद्यसंविद इदं मनस्तत्वं स्फुरति तदाऽनेकाकारेण जगद्भासते तदैव क्लेशानामुत्पत्तिः । यदा वेतृ संविदि स्फुरति तदा सर्वंद्वैतस्य विलापनामयी द्वैतनिवर्तिका अद्वयविमर्शविग्रहा अद्वैत-वृत्तिरुदेति, प्राणे संयति सति मूलाधारमारभ्य द्वादशान्तपर्यन्ता सती उत्तरावृत्ति-रुदीरिता कथिता योगिभिः, यया वृत्या पूर्णाद्वैतानुभवो भवति ॥१०॥

भावार्थ :—यह परा संविद् जव विषय में स्फुरित होती है तव अनेक रूप वाला यह संसार प्रतीत होता है। और जव वेत्ता अर्थात् ब्रह्म में स्फुरित होती है तव

सम्पूर्ण संसार लय हो जाता है। प्राणों के संयम होने पर ही उत्तरावृत्ति का उदय होता है, जिसके द्वारा ही पूर्ण अद्वैत का अनुभव होता है ॥१०॥

10. When the Para-Shakti expresses itself in material form the Variegated world of different shapes and substances comes into existence and when it manifests itself towards the Brahma the whole universe merges into the ultimate. The latter state can be comprehended by a perfect control over the Prana– the vital force of life. This control leads to the organic realisation of Advaita.

आसनानि नव चक्र संविदा-
मुद्भवस्थितिलयस्त्रयः क्रमात् ।
अङ्गषट्करचना षडध्वना-
मंशतावगतिरात्मसंविदा ॥११॥

टीका :—

जगदुत्पत्तिः स्थितिर्लयश्चैतत् संविद् तत्वतः क्रमेण भवति 'जन्माद्यस्य यतः' इति व्याससूत्रेण संमतञ्च। इदं शरीरमपि जगतः स्वरूपं तदंशमेव पिण्ड-ब्रह्माण्डयोरैक्यं कृत्वा कथयति नवचक्रसंविदामासनानि "अर्धचन्द्रः, निरोधिका, नादः, नादान्तः, शक्तिः, व्यापिका, समना, उन्मना महाशून्यं, इति नवस्थाना-न्येवासनानि संवित्तत्त्वस्य, षडध्वनामङ्गषट्करचना "वर्णः कला पदं तत्त्वं मन्त्रो भुवनमेव च। इत्यध्वषट्कं देवेशि भाति त्वयि चिदात्मनि॥ षट् चक्राणां स्थितिरत्राङ्गत्वेन गृह्यते। आत्मसंविद् अंशतावगतिरेव ज्ञातव्या। षडध्वाङ्ग-भूतवर्णैरेव षट्चक्राणां स्थितिरिति। मूलाधार, स्वाधिष्ठान मणिपूरानाहत विशुद्धाज्ञा, ललना सोमचक्र सहस्रारा इति संविदः कार्यकरणेन वासनानि। एषु स्थानेषु संयमात् संवित् तत्त्वस्य साक्षात्कारः षट् चक्रेषु भूः भुवः स्वः महः जनः तपः सत्यमिति समष्टिभूतानीमानि षडङ्गान्याहुः। अङ्गाङ्गिनोरैक्यात् स्थिरसुखमासनमिति योगशास्त्रे आसनात् स्थिरसुखप्राप्तिः प्रतिपादिता। इमानि नवासनान्यन्तरङ्गभूतानि तदर्थान्येव ॥११॥

भावार्थ :—इस संविद् तत्त्व अर्थात् परा शक्ति से ही संसार की उत्पत्ति, स्थिति और प्रलय होता है। उस पराशक्ति का आसन ब्रह्माण्ड के अनुसार इस पिण्ड

में भी नव संख्यात्मक हैं तथा छै स्थानों से जाने के मार्ग हैं । वही छै स्थान षट् चक्रों के नाम से व्यवहृत हैं ॥११॥

11. This Para-Shakti which is responsible for the creation, sustenance, and dissolution of this universe has got a ninefold seat in the Macrocosmos as well as in the microcosmos. The knowledge of these nine centres can be attained through six channels arising from the six chakras. The nine seats are—Ardha-Chandra, Nirodhika, Nada, Nadant, Shakti, Vyapika, Samana, Unmana and Mahashunya. The Shadadhwa responsible for the creation of this universe is made up of Varna, Kala, Pada, Tattwa, Mantra and Bhuwan. These are also symbolised by the six chakras.

काम ऊर्ध्वगत बिन्दुराननं
भानुरेष तदधो गतौ स्तनौ ।
चित्रभानुशशिनावुभौ कला
योनिरत्र स हरार्धकुण्डली ॥१२॥


टीका :---

कामकलास्वरूपमाह-कामेति ऊर्ध्वत्रिकोणस्वरूपे ऊर्ध्वविन्दुराननं मुखरूपं भानुः सूर्यस्वरूपश्चिन्तनीयः तदधोगतौ चित्रभानुरग्निः शशी चन्द्रश्च स्तनद्वयरूपेण चिन्तनीयौ । हरार्धकुण्डल्यत्र योनिरूपेण चिन्तनीया पूर्वोक्तादहमित्यस्माद् हकारवर्णादाविर्भूता तत्स्वरूपा च हरार्धकुण्डलीति ऊर्ध्वकुण्डलीति वा कथ्यते सा योनिरूपेण चिन्तनीया । इमा एव चतुष्कलारूपेणाग्रिमपद्ये कथयिष्यते ॥१२॥

भाषार्थ :—ऊर्ध्व त्रिकोण में ऊपर का विन्दु सूर्य है जो मुख रूप से चिन्तनीय है और नीचे के दोनों विन्दु अग्नि एवं चन्द्रमा हैं जिनका स्तनद्वय रूप से चिन्तन करना चाहिये । और अहं शब्द में योनिस्वरूपी हकार ही ऊर्ध्व कुण्डली के रूप में ध्यान करने योग्य है यही कामकला का स्वरूप है ॥१२॥

12. This stanza gives us an idea of Kamakala It is made up of two interesecting triangles, one with vertex upwards (Shiva) and the other with its vertex–downwards (Shakti).

The punctum (Bindu) on the apex of the triangle with its vertex upwards is 'Sun' (Surya) and the two puncta (Bindus) forming the end points of the base of the triangle are the 'moon' (Chandra) and Fire (Agni). The 'Sun' (Surya) should be meditated upon as face and the Moon (Chandra) and Fire (Agni) as two breasts. The apex of the triangle with its vertex downwards represents the Yoni wherein the letter Ha of the word Aham is meditated upon. This Ha also represents the Urdhva–Kundalini. This all is symbolic of Kama–Kala.



(HARA ARDH KALĀ)

एवमात्मनि चतुष्कलामये
सर्वतत्वसमवायलक्षणे ।
न्यासमाहुरिह वैखरादि वाग्
वृत्तित: समविशेषभावनाम्॥१३॥

टीका :—

एवं द्वादशश्लोकोक्तप्रकारेण चतुष्कलात्मके सूर्यचन्द्राग्नि हरार्धकला-रूपे आत्मनि संवित्तत्त्वे सर्वतत्त्वानां समवायलक्षण: षट्त्रिंशत्तत्त्वानां समुदाय-स्तस्मिन्निह वैखरादिवाग्वृत्तित: अकारमारभ्य क्षान्तपर्यन्तं न्यासं तथा सम-विशेषभावनाञ्च तत्त्वानामाविर्भावतिरोभावरूपामाहु: ॥१३॥

भाषार्थ :—उपरोक्त प्रकार से सूर्य, चन्द्र, अग्नि एवं ऊर्ध्व कुण्डलीगत संविद् तत्त्व ही ३६ तत्वों का आश्रय है। इसी स्थान पर अकार से लेकर क्षकार पर्यन्त मातृका का न्यास करना चाहिये। यहीं से तत्त्वों का आविर्भाव एवं तिरोभाव होता है ॥१३॥

13. In the above stanza (No. 12) Kama–Kala has been considered. It is constituted by Sun (Surya), Moon (Chandra), Fire (Agni) and the 'Urdhva–Kundalini'. This Kama–Kala is none else but Para–Shakti itself, also called the Samvittattwa. This is the abode of the thirtysix Tattwas. It is here only that the Nyas of the letters from Aa to Ksha should be done. The Tattwas evolve and dissolve from this place itself, verily the ultimate source of all. The four Kalas mentioned in this stanza are Sun (Surya), Moon (Chandra), Fire (Agni) and Haraardha Kala– the Yoni. The Para or Samvittattwa is made up of these four Kalas.

पूरुषत्वसमवाप्तिहेतुषु
यष्टिकाख्यनिजसूक्ष्मवर्ष्मण: ।
चित्पदे लयविधानमष्टवा-
ग्देवतान्यसनजुष्टमुत्तमम् ॥१४॥

टीका :—

पूरुषत्वसमवाप्ति: परतत्वप्राप्ति: तस्या हेतुषु साधनेषु यष्टिकाख्यं मेरु-दण्डरूपेण प्रसिद्धं तस्य निजसूक्ष्मवर्ष्मण: निजसूक्ष्मशरीरस्य सम्बन्धिन्य: अष्ट

वाग्देवता वशिन्याद्या: तासां न्यसनं न्यास: जुष्टं युक्तं चित्पदे संवित्तत्त्वे लयविधानमुत्तमं सर्वश्रेष्ठं मन्यन्ते साधकै: ।

अष्ट वाग्देवतानां मूलाधारमारभ्य सोमचक्र पर्यन्तं क्रमेण न्यास: वशिनी, कामेश्वरी, मोदिनी, विमला, अरुणा, जयिनी, सर्वेश्वरी, कौलिनी इत्यष्ट वाग्देवता: क्रमेण लयभावनया सर्वासां लये सति चित्पदस्यानुभूतिर्जायते ॥१४॥

भावार्थ :—परतत्त्व की प्राप्ति हेतु मेरुदण्ड के सूक्ष्म शरीर में वशिन्यादि आठ वाग्देवताओं का मूलाधार से लेकर सोमचक्र पर्यन्त न्यास करना चाहिए तथा क्रमश: इन देवताओं की लय भावना से साधक को परतत्त्व का अनुभव होता है ॥१४॥

14. In the worship of Shree Yantra, there are eight Vak Devtas viz. Vashini, Kameshwari, Modini, Vimala, Aruna, Jayini, Sarveshwari and Kaulini. The devotee (Sadhak) is advised to contemplate and meditate upon these eight Vakdevtas inside the subtle form of spinal cord and their Nyas should be done in the eight Chakras from Mooladhar upto Soma Chakra. By a systematic merger of one into the other in the chronological order, the Para is realised.

अन्तरङ्गकरणप्रभावत:
स्वप्रकाशनभसोऽत्र संक्रमात् ।
पीठभावमुपयान्ति तानि त-
न्न्यास कर्म परधाम्नि हृल्लय: ॥१५॥

टीका :—

अन्तरङ्गकरणप्रभावत: अन्तरङ्ग एकादशेन्द्रियप्रभावेण सत्तया स्वप्रकाशनभस: स्वयं प्रकाशनभसो रूपस्य ब्रह्मण: संक्रमात् सम्वन्धात् तानि पीठभावमुपयान्ति । एकादश पीठस्थानानि तेषां न्यासकर्म तेन परधाम्नि चित्पदे हृल्लयस्तेन ऐकाग्र्यं सम्पद्यते । कामरूपं, जालन्धरं, पूर्णगिरि: उड्डियानं, वाराणसी, अवन्ती, माया, द्वारावती, मधुपुरी, अयोध्या, काञ्ची इत्येकादश पीठस्थानानि । तान्येवान्तरङ्गे एकादशेन्द्रियाणि पीठभावमुपगतानि दश महाविद्यानामपि करणत्वेन ग्रहणम् । मनसोऽनिन्द्रियत्वेन दशानां पीठानामिन्द्रियाणाञ्चैतत्पक्षे

स्वीकारः मायां परित्यक्तवान् क्रमज्ञः। "इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः" इति प्रमाणात् इन्द्रियेभ्यो मनसः पृथग्ग्रहणात् ॥१५॥

भाषार्थ :—दश अथवा एकादश इन्द्रियाँ जो शरीर के अन्तर्भाग में स्थित हैं उनका सम्बन्ध स्वयं प्रकाशस्वरूप ब्रह्म से है उनमें ही काम रूप आदि पीठों का न्यास करने से परतत्त्व में एकाग्रता उत्पन्न होती है ॥१५॥

15. There are Eleven sense organs (Indriyas) including Manas and these are related to Brahma which is light (Prakash) itself If the devotee (Sadhaka) does the Nyasa of these eleven sense organs (Indriyas) in the eleven Peethas (the residing place of the deity), the all–absorbing realisation of the Para Tattwa is achieved. The eleven Peethas are Kamaroop, Jalandhar, Poornagiri, Uddiyan, Varanasi, Avanti, Maya, Dwaravati, Madhupuri, Ayodhya and Kanchi and the eleven sense organs (Indriyas) are five senses for knowledge (Gyanendrias and five senses for activity (Karmendiryas) and Manas (some people do not consider Manas as an Indriya). Maya peeth may not be included in Nyasa if Manas is not considered a sense organ (Indriya). The Brahama manifests itself or has relation with the external world through these sense organs (Indriyas). In fact their actual working represents the manifestation of Brahma. Moreover, the Peetha being the abode of a deity which is again a manifestation of Brahma, has been considered appropriate for the Nyasa of a sense organ (Indriya), hence the eleven sense organs (Indriyas) and eleven Peethas.

तत्वधाम युगमातृकात्मकं,
त्रित्रिकेण नियतेषु वस्तुषु ।
पादपात्रपरमामृतत्रयं,
तुर्यविश्रमणमर्घ्यशोभनम् ॥१६॥

टीका :—

तत्वानां धामतः संवित् तत्त्वतः युगमातृका स्वरव्यञ्जनभेदवती पुनश्च त्रित्रिकेण यकारमारभ्य क्षान्तेन सहत्रिकेण सर्वं वस्तुषु नियतेषु परमामृतत्रयं पादपात्रं पाद्यपात्रं तुर्यपदे विश्रमणं शोभनमर्घ्यं भवति। अकथादि संज्ञया च इदमेव व्यवहृतम् ॥१६॥

भाषार्थ :—संविद्तत्त्व से ही उत्पन्न स्वर व्यञ्जन द्विविध भेद वाली मातृका एवं यकार से लेकर क्षकार पर्यन्त तीन त्रिकों में विभक्त है। वह सम्पूर्ण वस्तुओं में नियत रूप से निवास करती है उसके तीनों त्रिक ही अमृतमय पाद्यपात्र हैं और उस मातृका का परतत्त्व में विश्राम ही अर्घ्य है। अकथादि संज्ञा से भी इसे ही कहा गया है ॥१६॥

16. The garland of letters which springs forth from Samvit Tattwa is composed of vowels and consonants, hence the word Yuga Matrika i. e. two types of Matrikas. The entire alphabet is divided into three portions (from Aa to Ksha), the first one ranges from 'Aa to 'Aha' (vowels), the second one from 'Ka to Ma' and the third one from 'Ya' to 'Ksha'. It resides eternally in all the objects. Now these three portions of the alphabet represent the embroisal Padya Patra (vessels used for offerring oblations) and the Arghya (offerring oblation by water) is nothing else but the dissolution of these three portions of the 'Matrika' in a state of complete blissful rest in the Para Tattwa. These are also represented by the 'Aa', 'Ka'. 'Tha' triangle.

मेदिनी प्रमुखमाशिवं मतं
तत्वचक्रमिहचक्रमुत्तमम् ।
स्वस्वभावसमवायभासिनी
देवता भवति सादिनी कला ॥१७॥

टीका :—

इह शास्त्रे मेदिनीप्रमुखमारभ्य आशिवं शिव पर्यन्तं तत्त्वचक्रं षट् त्रिंशत्-तत्त्वचक्रमुत्तमं चक्रं भवति। तत्त्वानां तत्स्वभावानाञ्च समवायः समूहस्तस्य

भासिनी प्रकाशिका सादिनी कला देवता भवति। सादाख्यतत्त्वाश्रिता सर्वं तत्त्वचक्रं प्रकाशयतीत्यर्थः ॥१७॥

भाषार्थ :—पृथ्वी से लेकर शिव पर्यन्त ३६ तत्त्व एवं उनके स्वभाव ही उत्तम चक्र हैं जिनको प्रकाशित करने वाली सादिनी कला है जो सदाशिव तत्त्व के आश्रित है। वही सम्पूर्ण तत्त्व चक्रों को प्रकाशित करती है ॥१७॥

17. From Prithvi Tattwa to Shiva Tattwa are the thirty six Tattwas which are brought to light by Sadini Kala and this Kala is dependent on lord Sadashiva. All the Chakras i. e, Centres of Power are being illumined through the rays of this Sadini Kala.

आन्तरस्य निजसंविदात्मनो
मातुरक्षकरणाध्वनो बहिः।
मेयसंविदि समर्पणं तदा-
वाहनं समरसत्वलक्षणम् ॥१८॥

टीका :—

सर्वान्तर्भूतस्य निजसंविदात्मनो मातुः प्रमातृरूपस्य अक्षकरणाध्वना इन्द्रियद्वारा मेयसंविदि प्रमेयतत्वे विषयप्रकाशकसंविदि यत्समर्पणं एकीभावमापन्ने संघट्टे समरसत्वलक्षणमद्वैतरूपं तदावाहनं भवति ॥१८॥

भाषार्थ :—संविदात्मक प्रमाता अर्थात् साधक अपनी इन्द्रियों के द्वारा उस मेय तत्त्व अर्थात् संविद् तत्त्व में एकीभावत्त्व प्राप्त करता है वही अद्वैत स्थिति है। उसी को पराशक्ति के पूजा का प्राथमिक उपचार आवाहन कहते हैं ॥१८॥

18. Now about inviting or invoking the deity (Aavahan) the author says that the devotee through his sense organs (Indriyas) establishes unison with the Samvit Tattwa that is the state of nonduality (Advaitya). This is supposed to be the first ceremony in the worship of Para.

पञ्चधैव यदिदं प्रपञ्चितं
पञ्चधानुभवशाश्वतोदयम् ।
तत्सुसंहरणमौपचारिकं
कर्म निर्मलनिजात्मसंविदि ॥१९॥

टीका :—

इदं दृश्यमानं प्रपञ्चितं जगत् पञ्चधैव पञ्चभूतरूपेण विस्तारमाप्तम् । पञ्चधानुभवेन शब्दस्पर्शरूपरसगन्धरूपेण शाश्वतोदयं नियमपूर्वकमुदयमेतेभ्यस्त-त्वेभ्यो जायते । अस्य पञ्चतत्त्वस्य संहरणमौपचारिकं कर्म निजात्मसंविदि पूजोपचार रूपं संहरणं लयकर्म भवति ॥१९॥

भावार्थ :—यह दृश्यमान सम्पूर्ण संसार पञ्चभूतात्मक है जिसका अनुभव शब्द, स्पर्श, रूप, रस, गन्ध स्वरूप से पाँच प्रकार का होता है । शरीर में इन तत्त्वों का नियमपूर्वक उदय होता है और क्रमानुसार इनका परतत्त्व में लय ही मानसोपचार पूजन है ॥१९॥

19. This whole visible universe is made up of five Tattwas. It is realised by oneself in its five fold manifestations as Sound, Touch, Form, Taste (Rasa) and Smell. These are very subtle Tattwas called the Tanmatra and these evolve in an ordained fashion and their dissolution in a chronological order into Para Tattwa constitutes the mental form of worship.

यस्तु पञ्चदशधा प्रकल्प्यते
काल एष शशिभानुसंक्रमात् ।
तस्य शाश्वतपदे लयक्रिया-
नित्यवासरकलार्चनं मतम् ॥२०॥

टीका :—

अथाद्यास्तिथयस्सर्वे स्वरा बिन्द्ववसानगाः तदन्ताः काल योगेन सोमसूर्यौ प्रकीर्त्तितौ । अकारमारभ्य (अं) इति पञ्चदशस्वरपर्यंन्ताः शशिभानुसंक्रमात्

सूर्यचन्द्रयोगात् पञ्चदशतिथय: अहोरात्ररूपा: जायन्ते। एतस्य सर्वस्यैष: काल एव हेतुस्तस्य शाश्वतपदे लयक्रिया (अ:) इति षोडशी कला रूपं शाश्वतपदं तस्मिन् लये सति नित्यवासरकालार्चनं नित्यप्रकाशमयदिवसकालार्चनं मतम् ॥२०॥

भाषार्थ :—अकार से लेकर (अं) पर्यन्त पन्द्रह स्वर ही दिन और रात रूप में पन्द्रह तिथियाँ होती हैं। अस्तु, इन पन्द्रह स्वरों का काल से योग है और सोलहवाँ स्वर (अ:) ही परतत्त्व है जहाँ कि सदैव प्रकाश रहता है। उसका अर्चन ही नित्य दिवसकला का अर्चन है ॥२०॥

20. The fifteen vowels from Aa to Ang correspond to the fifteen diurnal cycles of Sun and Moon. Thus, these fifteen vowels bear a direct relation with time i.e. Kala. The sixteenth vowel Aha represents the Para–Tattwa which is beyond the diurnal variation of time as it is eternal light itself. The worship of this Eternal Light (i. e. Nitya–Divas–Kala) (Eternal day) is the real worship.

बाह्यचक्रमुपगा मरीचय-
स्तत्वजाललसदात्मसंविद:।
तत्समर्चनमतीतचिन्मया-
नाख्यधाम्नि विलयक्रमक्रिया ॥२१॥

टीका :—

बाह्यपूजनचक्रं श्रीचक्रं मूलबिन्दुमारभ्य त्रैलोक्यमोहनचक्रपर्यन्तं तत्स्था मरीचय: एकाधिकनवतिसंख्याका किरणरूपा देवतास्तत्त्वजालेन लसतो-युक्तस्यात्मसंविद आत्मतत्त्वस्य वाङ्मनसयोरतीतमतिक्रान्तं चिन्मयमनाख्यं कथयितुमशक्यं धाम तस्मिन् विलयक्रमक्रिया क्रमेण लयचिन्तनं तत्समर्चनं सम्यक्पूजनं भवति। मूलबिन्दुतत्त्वात् प्रसृतस्य तत्रैव लयभावनं तत्समर्चनपदेनात्र चिन्तनं सम्मतम् ॥२१॥

भाषार्थ :—श्रीचक्र में बिन्दु से लेकर त्रैलोक्यमोहनचक्र पर्यन्त एकानवे (९१) संख्यात्मक किरण देवताओं का षट्त्रिंशत् तत्त्व युक्त अनिर्वचनीय पराशक्ति में क्रमश: लय की भावना का चिन्तन ही श्रेष्ठ पूजन है ॥२१॥

21. In the external form of Shree Yantra from the punctum (Bindu) on to the Trailokya-Mohana Chakra there are ninety one deities presiding over the ninety one rays emanating from the Shree Yantra. These should be meditated upon as dissolving one by one into the other finally culminating into the Para-Shakti which contains in itself the thirty six Tattwas and this constitutes the best form of worship.

यच्चतुर्विधमिदं विभासते
तत्त्वरूपममृतान्तराकृतिः ।
तस्य पञ्चमपदे लयक्रिया
सम्मतं बलिचतुष्टयं तथा ॥२२॥

टीका :—

यः परमात्मा अमृतान्तराकृतिः अन्तःस्थितामृतकलावानिदं दृश्यमानं चतुर्विधं स्वेदजाण्डजोद्भिज्जजरायुजरूपं विभासते अथवा जाग्रत्स्वप्नसुपुप्तितुर्याख्यं विभासते तस्य पञ्चमपदे तुर्यातीते लयक्रिया वलिचतुष्टयं सम्मतं समीचीनं मतम् ॥२२॥

भाषार्थ :—जिस परा शक्ति में अमृत कला का निवास है उसी के द्वारा यह दृश्यमान चार प्रकार की सृष्टि (स्वेदज, अण्डज, उद्भिज्ज, जरायुज) एवं चार अवस्थाएँ (जाग्रत् स्वप्न सुपुप्ति तुरीय) स्फुरित होती हैं इन चारों का तुर्यातीत पद में लय करना ही चार प्रकार का वलिदान श्रेष्ठ कहा गया है ॥२२॥

22. The Para-Shakti which embodies the Amrit Kala brings about the manifestation of the four-fold creation (sweat born, egg born, seed born and membrane born), and the four states of consciousness, namely wakeful state (Jagrati), dream state (Swapna), the deep sleep state (Sushupti) and Turiya state The merger of the four states into the Turiyateet the peak experience, constitutes the noblest form of the four types of sacrifices. (Sacrifice as a ritual which forms an integral part of the external worship).

पञ्चधा प्रसरतश्चिदात्मनो
ह्यान्तरस्य बहिरिन्द्रियात्मना।
सामरस्यमिह संविदात्मना-
रार्त्तिकं परमिदं समीरितम् ॥२३॥

टीका—

पञ्चधा प्राणापानसमानव्यानोदानरूपेणान्तरस्य चिदात्मनः हि प्रसरतः विस्तारं प्राप्तस्य बहिः पञ्चेन्द्रियात्मना श्रोत्र-त्वक्-चक्षू-रसना-घ्राणरूपेण इह चिदात्मनि संवित्स्वरूपे सर्वेषां लयेनेदं परं श्रेष्ठमारार्तिकं समीहितं प्रोक्तं महात्मभिः ॥२३॥

भाषार्थ :—पाँच प्रकार (प्राण, अपान, समान, व्यान, उदान) से विस्तार प्राप्त अन्तरात्मा का पञ्चेन्द्रिय रूप से पराशक्ति में लय ही महात्माओं ने सर्वश्रेष्ठ आरती उपचार बताया है ॥२३॥

23. Expanded in its potential through the five Pranas (Prana, Apana, Samana, Vyan, Udan) and manifesting itself through the five sense organs (Panch Indriyas) namely Ears. Skin, Eyes, Tongue and Nose, the self (Antaratma) when merged into the Para–Shakti forms the best kind of Aarati as stated by saints. (Aarati is a ritual where five flames are lighted and offered unto the Deity. The five flames are five sense organs activated by five Pranas).

वाक्सहैव मनसा निवर्तते
ऽप्राप्य निष्कलनिरञ्जनाद्यतः।
तत्र निर्मनसि शब्दवर्जिते
धाम्नि विश्रमणमुत्तमो जपः ॥२४॥

टीका :—

यतो यस्मान् निष्कलनिरञ्जनात् संवित्तत्त्वात् मनसा सह वाक् शब्दशक्तिः तत्स्वरूपमप्राप्य स्वसामर्थ्याद्बहिर्ज्ञात्वा निवर्तते प्रकाशयितुमशक्यमिति मन्यते।

तत्र निर्मनसि मनसाऽगम्ये शब्दवर्जिते शब्देन प्रकाशयितुमशक्ये धाम्नि प्रकाश-स्वरूपे विश्रमणमुत्तमो जपः मनसा भावश्रेष्ठो जपः इति भावः ॥२४॥

भाषार्थ :—वह परतत्त्व निष्कल और निरञ्जन है, अतएव मन और वाणी की पहुँच वहां नहीं है। इसलिए उस शब्दशक्ति–वर्जित एवं मन से अगम्य उस प्रकाश स्वरूप परतत्त्व में विश्राम ही श्रेष्ठ जप है। २४॥

24. The Para Tattwa has no attributes and is flawless, hence called Nishkala and Niranjan. It is beyond the grasp of thought and speech. Final repose in this inconceivable, indescribable, self-effulgent Para Tattwa is the best kind of Japa.

बिम्बितं स्फुरति यत्र संविदा
रूपमान्तरमिदन्तया बहिः।
विश्वमेतदखिलं चराचरं
दर्पणं हृदयदर्पणं परम् ॥२५॥

टीका :—

यत्र विम्वितं विम्वस्वरूपमिदन्तया विषयरूपेणान्तरमिदं रूपं संवित्तत्वेन वहिः नामरूपात्मकरूपेण स्फुरति व्यनक्ति तदखिलं चराचरं हृदयदर्पणं विश्व-मेतत् परं श्रेष्ठं दर्पणं सम्मतम् ॥२५॥

भाषार्थ :—जिसमें विम्व रूप से प्रतिविम्वित होकर वह परतत्त्व नामरूपात्मक रूप से व्यक्त होता है, यह चराचर सम्पूर्ण विश्व ही हृदयदर्पण है। यही श्रेष्ठ दर्पणोपचार है ॥२५॥

25. In the external worship the deity after having been bathed, anointed and dressed is shown a mirror which is called Darpanopchar. The learned author explains its esoteric significance. The Para Tattwa reflects itself in illusory forms and names constituting the universe. To mirror the same reality in one's own heart is the best Darpanopchar.

The devotee should experience unity with the expanded universe and the deity in his heart and thus reflect them as in a mirror.

छादयन्निखिलमात्मसंविदा
त्रायते निखिलतापसंकटात् ।
यच्चिदम्बरगतं शिवात्मकं
छत्रमत्र कमलं सुधामलम् ॥२६॥

टीका :—

निखिलं जगदात्मसंविदा पराशक्त्या निखिलतापसंकटात् आध्यात्मिकाधिदैवताधिभौतिकतापसंकटात् या त्रिविधदुःखात् त्रायते। यच्चिदम्बरगतं परव्योमस्थितं सुधावदमलं निर्मलं कमलं सहस्रारे स्थितं सर्वं छादयन् अत्र संविद्विषये छत्रं सम्मतम् ॥२६॥

भावार्थ :—पराशक्ति के द्वारा आध्यात्मिक, आधिभौतिक, आधिदैविक इन त्रिविधि दुःखों से रक्षा होती है। परव्योम अर्थात् सहस्रार-स्थित कमल अमृत के समान निर्मल है और सबको आच्छादित किये हुए है। वही पराशक्ति का छत्र है ॥२६॥

26. The Para–Shakti protects the devotee from the three types of miseries which may be spiritual, worldly or of godly origin. Absolutely pure like nectar, the thousand petalled lotus, situated in (Para Vyoma) Sky (Akash) beyond all, envelopes everything underneath. This thousand petalled lotus is the Royal Chhatra or Canopy to be offered to Para Shakti.

पञ्चधा स्फुरणमेव संविद—
श्चामरं विविधचातुरक्रमम् ।
विश्वदृग्लयविन्नित्रनिर्मितं
स्वेक्षणं परमकम्पदं तपः ॥२७॥

टीका :—

संविद:=चिदात्मन: पञ्चधा चिद् आनन्द: इच्छा ज्ञानं क्रिया चैतदभिमानि-देवता: सदाशिव:, ईश्वर:, रुद्र:, विष्णु:, ब्रह्मा च विविधचातुरक्रमं स्थूलं सूक्ष्मं सूक्ष्मतरं सूक्ष्मतमञ्च विश्वदृशोऽनेकप्रकारिका दृष्टयस्तासां लय विचित्रेण निर्मितं स्वेक्षणं संवित्तत्वस्य चलनक्रियया पुन: पुनर्दर्शनं परमकम्पदं स्फुरणमाविर्भवनं तप एव चामरं पूजाङ्गं भवति ।।२७।।

भावार्थ :—संवित् तत्त्व का चार क्रम से (स्थूल, सूक्ष्म, सूक्ष्मतर, सूक्ष्मतम) एवं पाँच प्रकार (चिद्, आनन्द, इच्छा, ज्ञान, क्रिया) के चिन्तन द्वारा सम्पूर्ण प्रकार की दृष्टियों का लय करते हुये चलन क्रिया द्वारा स्फुरित होते हुए उस आत्मतत्त्व का साक्षात्कार ही चामरोपचार है ।।२७।।

27. Further, the author describes the (Chamaropachara). The Samvit Tattwa is composed of Chit, bliss (Ananda), divine will (Iccha), knowledge (Gyan) and action (Kriya) and they are controlled by the governing deities Sadashiva Ishwar, Rudra, Vishnu and Brahma. They manifest themselves as gross, subtle, more subtle and most subtle. Their dissolution back into Para by Chalan–Kriya and consequently the realisation of self (Atma Tattwa) is the best Chamaropachar. The Chamars are always moved to and fro and symbolic of that act is the Chalan Kriya vibrations produced in the process of evolution and dissolution of the five fold mainfestations of Para and their governing deities.

एषणात्रयमयस्य वर्ष्मण-
स्तत्वसंचयमयस्य संविदि ।
धाम्नि तत्त्वसमतीतसत्वके
स्वात्मन: खलुनिवेदनं मतम् ।।२८।।

टीका :—

एषणात्रयमयस्य लोकैषणा, पुत्रैषणा, वित्तैषणेति एषणात्रय तन्मयस्य वर्ष्मणो: जीवात्मतत्त्वस्य तत्त्वसंचयमयस्य पञ्चतत्त्वैकत्रीभूतस्य ! षट्त्रिंशत्-तत्त्वातिक्रान्तसत्त्वके स्वरूपे परतत्त्वे धाम्नि प्रकाशमये संविदि खलु निश्चयेन

सर्वभावेन स्वात्मनः समर्पणं निवेदनं मतम् । 'यत्करोषि यदश्नासि यज्जुहोषि-ददासि यत्' इत्यादिना गीतायां यदुक्तम् तदेवात्र सुसङ्गतम्भवति ॥२८॥

भाषार्थ :—तीन एषणाओं वाले पाञ्चभौतिक शरीराभिमानी जीवात्मा को षट्त्रिंशत् तत्त्व से परे प्रकाशमय सात्विक परतत्त्व में सर्वभावेन जो समर्पण है वही पूजा का निवेदन है ॥२८॥

28. There are three main worldly desires, Power, Progeny and Wealth haunting the human being. The author here explains the offerings Nivedanam for the worship of Para in its esoteric aspect.

The Nivedanam consists in the total surrender of the 'self' having three fold desires and is proudly conscious of its physical form made up of five elements,into the Para Tattwa which is Sattwic effulgent and is beyond all the thirty six Tattwas.

स्वप्रकाशवपुषा गुरुः शिवो
यः प्रसीदति पदार्थमस्तके
तत्प्रसादमिह तत्त्वशोधनं
प्राप्य मोदमुपयाति भावुकः ॥२९॥

टीका :----

पदार्थमस्तके सर्वतत्त्वमूर्धन्यभूते स्वप्रकाशवपुषा प्रकाशमयविग्रहेण यः स्थितः शिवः स एव गुरुर्यदा प्रसीदति प्रसन्नोभवति तत्प्रसादमिह शिष्ये तत्त्व-शोधनं तत्त्वानां निर्मलीभावं प्राप्य भावुको गुरुभावनायुक्तः शिष्यो मोदं हर्षं परमानन्दरूपमुपयाति प्राप्नोति । भूतशुद्ध्यादिकन्तु तदन्तर्गतमेव ॥२९॥

भाषार्थ :—सहस्रार में सम्पूर्ण तत्त्वों के ऊपर प्रकाशमय शरीर वाले भगवान् शिव ही गुरु हैं । वह जब प्रसन्न होते हैं तब शिष्य को तत्त्व शुद्धि प्राप्त होती है एवं गुरु भावना से युक्त शिष्य प्रसन्न होकर परमानन्द प्राप्त करता है ॥२९॥

29. In the thousand petalled lotus beyond all the Tattwas the effulgent Lord Shiva himself is the master or Guru.

When he is pleased, the disciple is blessed with the purification of his Tattwas, and thus experiencing oneness with the Master (Guru) the disciple attains absolute bliss and peace.

पाशजालकमिदं परं पशो–
नाशकारणमतो मतं हविः ।
तत्त्वतो निजगुरोर्निरीक्षणा–
त्प्राप्यते तदमलं पवित्रितम् ॥३०॥

टीका :—

पशोर्जीवात्मनः इदं दृश्यमानं सर्वं परमतीव क्लेशकारकं पाशजालकं बन्धजनकमध्यात्मशास्त्रे निर्णीतम् । अतस्तस्य नाशकारणं हविर्मतम् । होमकार्यस्य प्रकाशात्मकत्वात् तद्द्रव्यस्य च दाह्यत्वाच्च पाशजालोऽपि तत्समः । तत्त्वतो निजगुरोर्निरीक्षणात् कारुणिकगुरुद्रष्ट्या निरीक्षणादवलोकनादमलं निर्मलं पवित्रितं शुद्धं ज्ञानं प्राप्यते । "ज्ञानाग्निः सर्वं कर्माणि भस्मीकरोतीदमेवात्र हविर्मतम् । अपाने जुह्वति प्राणमित्यादि स्मरणात् ॥३०॥

भावार्थ :—पाशबद्ध जीव का दृश्यमान सम्पूर्ण संसार पाशजाल अर्थात् बन्धन है उसके विनाश हेतु इस प्रकार का होम आवश्यक है कि गुरुदेव की दया दृष्टि से शिष्य को निर्मल और पवित्र ज्ञान प्राप्त हो जिसकी अग्नि से वह पाशजाल भस्म हो जाय ॥३०॥

30. The bonded self (Jeeva) is trapped in this manifest world of desires. This mesh in which the self (Jeeva) is entangled can be destroyed only by the fire of knowledge (Gyan) attained by the kindness of the master (Guru) and such a burning up of worldly bondages is the Homa i. e. the offering of oblations to the sacrificial fire.

वेद्यराशिधमनेन विश्वतो
निर्विकल्पमयवासनोल्बणम् ।
चित्तमेव धमनं शिवे मुख–
स्यार्पणं धमनिकार्पणं परम् ॥३१॥

विश्वतः सर्वतो वेद्यराशिधमनेन प्रमेयराशिनिवर्तनेन तस्य सविकल्पकत्वान्निवर्तनमेव श्रेयः। निर्विकल्पमयवासनोल्वणं सामरस्यमयभावनया प्रखरतमं चित्तमेव शिवे परमतत्त्वे मुखस्यार्पणं परमश्रेष्ठं धमनं धमनिकार्पणं भवति मुखेनेयं धमनक्रिया होमकर्तृभिः क्रियते चित्तधमन भस्त्राप्राणायामेन भवति ।।३१।।

भावार्थ :—निर्विकल्प समाधि की तीव्र भावना द्वारा सम्पूर्ण विषयराशि भस्म हो जाती है, मन निर्मल हो जाता है और उसका शिव तत्त्व में समर्पण ही होम के लिए उक्त तीव्र भावना रूपी धौंकनी है। यह भस्त्रा-प्राणायाम का स्वरूप है ।।३१।।

31. The intense longing for the Nirvikalpa Samadhi consumes all wordly desires and the Manas attains an immaculate purity. The intensity of feeling behind the surrender of the purified self to the Shiva Tattwa is like the bellows to the sacrificial fire. In fact, the process represents the Bhastra Pranayam.

दीयते परशिवैक्यभावना
क्षीयते सकलपापसंचयः।
येन चिज्जलधिपारसेतुना
दीक्षणं गुरुकटाक्षवीक्षणम् ।।३२।।

टीका :—

साधकसाफल्यस्य गुरुमूलकत्वाद् गुरुकटाक्षमुपदिशन्नाह :—दीयत इति।

यदा श्रीगुरुणा परशिवैक्यभावना अद्वैताख्या शिष्यकल्याणाय दीयते उपदिश्यते तदा तया दृष्टिशक्तिपातदीक्षया सकलपापसंचयः समस्तपापराशिः नश्यति चिज्जलधिसेतुना चिदात्मसिन्धोः सेतुवत् तरणोपायभूतया गुरुकटाक्षवीक्षणमेव दीक्षणं भवति। एतदनुभवात्मकेन रूपेणैव ज्ञातुं शक्यम् ।।३२।।

भावार्थ :—जब श्रीगुरुदेव शिष्य-कल्याण के लिये अद्वैत तत्त्व का उपदेश करते हैं तब उनके कृपादृष्टि पूर्वक देखने से दीक्षा प्राप्त होती है यही शक्तिपात है। इसके द्वारा समस्त पापराशि नष्ट हो जाती है यही परतत्त्व रूपी समुद्र के पार करने के लिये सेतु है। इस प्रकार श्री गुरुदेव का कृपा पूर्वकनिरीक्षण ही श्रेष्ठ दीक्षा है ।।३२।।

32. When the Master (Guru) preaches the Advaita Tattwa for the emancipation of the disciple and graces him with kind looks, the latter gets initiated (Diksha). Verily, this is Shaktipata, which destroys all the sins and serves as a bridge to cross the ocean of Para Tattwa. Such a kind, benevolent glance of the master is the best initiation (Diksha) for the disciple.

अन्तरङ्गकरणात्मनाञ्चतुः-
स्रोतसां विविधदेवताजुषाम् ।
पूजनं परमिहोन्मनीशिखा-
मध्यवर्ति हि शिवात्मयोजनम् ॥३३॥

टीका :—

अन्तरङ्गकरणात्मनाञ्चतुःस्रोतसां चतुरन्तरङ्गप्रवाहितानां मनोबुद्धि चित्ताहङ्काररूपाणां विविधदेवताजुषां ब्रह्मविष्णुरुद्रचन्द्रदेवैः सेवितानां करण-रूपेण पञ्चज्ञानेन्द्रियाणाञ्चोन्मनीशिखामध्यवर्ति मध्येशिवात्मनोर्जीवात्म परमात्मनोर्योजनमिह परं प्रकृष्टं पूजनं भवति ॥३३॥

भावार्थ :—अन्तरङ्ग से प्रवाहित चार स्रोत मन, बुद्धि, चित्त, अहङ्कार एवं उनके अधिष्ठाता देवताओं के द्वारा उन्मनी अवस्था में जीव और परमात्मा का योजन ही सर्वश्रेष्ठ पूजन है ॥३३॥

33. The four fold streaming out of the inner self in the form of Manas, Buddhi, Chit, and Ahankara is controlled by their presiding deities Brahma, Vishnu, Rudra and Chandra. The merger of the self (Jiva) and the Shiva in the Unmani state attained by the inner self, is the best kind of worship.

पञ्चबोधकरणानि मानसं
दर्शनानि विषयप्रदर्शनात् ।
दर्शनानि षडमूनि तानि त-
त्पूजनं भवति तल्लयाच्चिचदि ॥३४॥

टीका :—

पञ्चबोधकरणानि पञ्चज्ञानेन्द्रियाणि मानसं च पञ्चविषयाणां प्रदर्शनाद्दर्शनानि ज्ञानानि भवन्ति षडमूनि तानि दर्शनानि तेषां सर्वेषां चिदि संवित्तत्त्वे क्रमेण लयात् तत्पूजनं भवति ॥३४॥

भाषार्थ :—पाँच ज्ञानेन्द्रियाँ (श्रोत, त्वक्, चक्षू, रसना, घ्राण) तथा मन पाँचों ज्ञानों का प्रदर्शक होने से इस प्रकार ज्ञान के छैः प्रकार हैं। इन सबका क्रमश: परतत्त्व में लय ही पराशक्ति का पूजन है ॥३४॥

34. Five sense organs for knowledge (Gyanendriyas), Ears, Skin, Eyes, Tongue and nose are activated by Manas. It being the exhibitor of the five forms of knowledge, constitutes the six types of Gyana along with five sense organs. Their dissolution respectively in Para–Tattwa is the worship of Para Shakti.

जाग्रदादिसमयाश्चतुर्विधा
ह्यन्तरात्मपरमात्मविग्रहा: ।
पञ्चमेऽत्र तदतीतचिद्घने
धाम्नि तल्लयमतिस्तदर्चनम् ॥३५॥

टीका :—

जाग्रदादिसमया: जाग्रत्, स्वप्न, सुषुप्ति, तुर्यादि चतुर्विधा: संकेता अन्तरात्मपरमात्मनोर्जीवात्मपरमात्मनोर्विग्रहा: शरीराणि समष्टिव्यष्टिरूपाणि स्थूलसूक्ष्मभेदवन्ति तदतीतचिद्घने पञ्चमे तुर्यातीते धाम्नि परब्रह्मणि तल्लयमतिरुभयोरेकत्वमतिस्तदर्चनं पूजनं भवति ॥३५॥

भाषार्थ :—जीवात्मा और परमात्मा की चार अवस्थायें (जाग्रत्, स्वप्न, सुषुप्ति और तुर्य) ही व्यष्टि और समष्टि रूप से उनके शरीर हैं। इन सबसे परे तुर्यातीत अवस्था में जीवात्मा और परमात्मा की एकत्व भावना बुद्धि ही उसका अर्चन है ॥३५॥

35. The self (Jeevatma) and God (Paramatma) both exist in the four states of consciousness– the wakeful state (Jagrat), state of dream (Swapna), state of deep sleep (Sushupti) and Turiya. Beyond these four states of existence there is one more state – Turiyateet, where unison can be established between self (Jeevatma) and God (Paramatma) and this mental attitude of unity of individual self into the universal self is the best worship (Archana).

खे निरस्तनिखिलागमक्रियै–
र्या च निश्चरति शाश्वतोदया ।
सा शिवत्त्वसमवाप्तिकारिणी
खेचरी भवति खेदहारिणी ॥३६॥

टीका :—

उक्त दीक्षणे लब्धे सति खे व्योम्नि निरस्तनिखिलागमक्रियैः कर्मप्रतिपादकशास्त्रजालरहितैः पूर्णवैराग्यशीलैः सेविता शाश्वतोदया विविधप्रत्यवायरहिता या अवस्था निश्चरति वर्तते सा शिवत्वसमवाप्तिकारिणी सर्वक्लेशनिवृत्तिपूर्वकं पूर्णानन्ददायिनी अतएव खेदहारिणी खेचरी मुद्रा भवति ।

उक्तञ्च :—"मनः स्थिरं यस्य विनावलम्बनं वायुःस्थिरो यस्य विनावरोधनम् । दृष्टिःस्थिरा यस्य विनावलोकनं स्यात् सैव मुद्रा विमला च खेचरी ॥ इयमेव भैरवी मुद्रा शाम्भवी नाम्ना च साधकैर्व्यवह्रियते ॥३६॥

भावार्थ :—उक्त दीक्षा प्राप्त कर साधक सम्पूर्ण कर्मजाल से मुक्त होकर परव्योम में जिसका सेवन करता है वह अवस्था सब प्रकार के विघ्नों से रहित है तथा सम्पूर्ण क्लेशों को निवृत कर पूर्णानन्द देती है । अतः समस्त दुःखों को हरण करनेवाली यही खेचरी मुद्रा है ॥३६॥

36. Having been initiated as stated above, the devotee (Sadhaka) is free from all the tangles of rituals of scriptures (Karmas) and enjoys this blissful state in Paravyom the highest Akashick plane. This state liberates him from all

miseries and bestows eternal bliss. This particular posture (Mudra) of mind is called Khechari which destroys all torment and grief. Khechari is known to be a state where the mind (Manas) is steadfast without any effort and the Prana is in suspension without any conscious attempt and the gaze is intent without any object of perception. It is also known as Bhairavi or Shambhawi Mudra.

यत्स्वरूपमहिमा विकल्पतः
शक्तिचक्रमिह रज्जुसर्पवत् ।
तत्स्वरूपपरमार्थबोधत-
स्तत्र तस्य विलयो विसर्जनम् ।।३७।।

यत्स्वरूपस्य परमार्थरूपसंवित्तत्त्वस्य महिम्ना आसमन्ताद्विकल्पतः=विकल्पविषयकसमस्तकार्यंतस्तत्स्वरूपस्य परमार्थबोधतः=अनिवर्त्यबोधादिह बोधे सति रज्जुसर्पवत् यथान्धकारे भ्रान्त्या रज्जौ सर्पबुद्धिर्जायते । अधिष्ठानभूतरज्जुज्ञाने जाते सर्पबुद्धेर्लयः=निवृत्तिस्तद्वत्तत्राधिष्ठानभूते संवित्तत्त्वे साक्षात्कारे सति इदं दृश्यमानं शक्तिचक्रं मायामयं विलीयते । एतादृशो विलयः पूजाविसर्जनं भवति ।।३७।।

भावार्थ :—परमार्थस्वरूप संवित् तत्त्व की महिमा से ही सांसारिक समस्त मायिक कार्यों से मुक्ति मिल जाती है और उसके रूप का वास्तविक बोध हो जाता है जिससे यह दृश्यमान मायामय शक्तिचक्र विलुप्त हो जाता है । जैसे कि अन्धकार में पड़ी हुई रस्सी में सर्प का भ्रम, वह भी रस्सी के वास्तविक ज्ञान होने पर नष्ट हो जाता है । इस भ्रम का विलय ही पूजा का विसर्जन है ।।३७।।

37. The grace of Samvit Tattwa liberates one from all the tangles of the world and the reality reveals unto him. Consequently this Shakti Chakra i. e. the Universe of names and shapes created by Maya disappears. In darkness a piece of cord can be mistaken for a snake, but when the real knowledge regarding the cord dawns upon the individual, the fear completely vanishes. This disappearance of the illusion is Visarjan– the culmination of Puja.

या क्रिया समभिहारतस्त्रिधा
दीक्षितस्य गुरुभावनाधिका ।
सा विभेदलयभावनादिका
लभ्यतां परशिवैक्यसिद्धये ॥३८॥

श्री गुरुभावनया अधिका श्रेष्ठत्त्वमाप्ता दीक्षितस्य दीक्षां प्राप्तस्य विभेदलय-भावनादिका भेदनिवृत्तिपूर्विका अद्वैतज्ञानसमर्पिका सा क्रिया समभिहारत: त्रिधा परा, अपरा, परापरा इति त्रिधा कथनतो वास्तविकरूपेण तु एकैव सा पर-शिवैक्यसिद्धये परशिवो निर्गुण: परमशिव: सगुणस्तदैक्यसिद्धये अद्वैतलब्धये हे शिष्य गण ? लभ्यतां प्राप्यतामित्याशंसनं शिष्याणां कल्याणायेति ॥३८॥

इति चिद्विलासस्य प्रबोधिनी वृत्ति: समाप्ता ॥

भाषार्थ :—श्री गुरु की भावना से जो अधिक श्रेष्ठ हो गयी है एवं दीक्षित साधक की भेदबुद्धि को नष्ट कर जो अद्वैत ज्ञान देती है तथा जो तीन प्रकार की होने पर भी वास्तव में एक है वही अद्वैतज्ञानप्रदायिनी क्रिया शिष्यगण को सगुण निर्गुण दोनों में अद्वैतावस्था प्रदान करे ॥३८॥

38. The learned author the last Shloka offers his blessings for the devotees. Ennobled by the grace of the Master (Guru), the Kriya which falls into three categories Para, Para Apra, Apra but is still one, and which gives the devotees (Sadhakas), the knowledge of the Advaita after ending his illusory discrimination, may bestow upon the disciples the realisation of the Advaita in both the states of Sagun (with attributes) and Nirgun (without attributes).

इति चिद्विलास भाषार्थ सम्पूर्ण

□□□